योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०८६

षडशीतितमः सर्गः ८६

श्रीभानुरुवाच ।

कल्पनाम्नि महादेव ह्यस्तने दिवसे तव ।

तले कैलासशैलस्य जम्बूद्वीपैककोणके ।। १

सुवर्णजटनाम्ना यस्त्वत्पुत्रैर्जनितप्रजैः ।

मण्डलं कल्पितं श्रीमदनल्पसुखसुन्दरम् ।। २

तत्राभूदतिधर्मात्मा ब्राह्मणो ब्रह्मवित्तमः ।

इन्दुनामातिशान्तात्मा कश्यपस्य कुलोद्भवः ।। ३

तस्मिंस्तदा निवसतो नित्यं स्वजनमण्डले ।

तस्य प्राणसमा भार्या काचित्तस्यां महात्मनः ।। ४

न बभूवात्मजस्तस्य मरुभूमौ तृणं यथा ।

न व्यराजत सा भार्या तस्य निष्फलपुष्पिता ।। ५

ऋज्वी गौरी सुशुद्धापि शून्या शरलता यथा ।

तौ ततो दंपती खिन्नौ पुत्रार्थे तपसे गिरेः ।। ६

कैलासस्यांशमारूढौ रूढाविव नवद्रुमौ ।

भूतैरनावृते शून्ये तस्मिन्कैलासकुञ्जके ।। ७

तेपतुस्तौ तपो घोरं जलाहारौ तरुस्थिती ।

एकं पानीयचुलकं पीत्वा दिवसपर्यये ।। ८

निस्पन्दमुत्थितौ वार्क्षी वृत्तिमाश्रित्य संस्थितौ ।

तस्थतुस्तौ तदा तत्र तावत्कालं तरुव्रतौ ।। ९

यावत्त्रेता द्वापरं च युगे द्वे एव ते गते ।

ततस्तुष्टोऽभवद्देवस्तयोः शशिकलाधरः ।। १०

दिनातपातापितयोरिन्दुः कुमुदयोरिव ।

आजगाम तमुद्देशं यत्र तौ विप्रदंपती ।। ११

सलतापादपं देशं पुष्पाकर इवेश्वरः ।

दंपती तौ वृषारूढं सोमं सोमार्धशेखरम् ।। १२

फुल्लाननौ ददृशतुः कुमुदे शशिनं यथा ।

तौ तं प्रणेमतुर्देव तुषारामलमीश्वरम् ।। १३

द्यावापृथिव्यावुदितं परिपूर्णमिवोहुपम् ।

तर्जयन्पवनाधूतनववृक्षाननस्वरम् ।। १४

मृदूहामस्मितस्पन्दि प्रोवाचाथ वचः शिवः ।

ईश्वर उवाच ।

वरं विप्र गृहाणाशु तुष्टोऽस्मि तव वाञ्छितम् ।। १५

मधुमासरसाक्रान्तवृक्षवन्मुदितो भव ।

विप्र उवाच ।

भगवन्देवदेवेश दश पुत्रा महाधियः ।। १६

भव्या भवन्तु मे भूयः शोको येन न बाधते ।

भानुरुवाच ।

अथैवमस्त्विति प्रोच्य जगामान्तर्धिमीश्वरः ।। १७

व्योम्नि वारिनिधिर्ह्रादं कृत्वेवोर्मिमहावपुः ।

ततस्तौ दम्पती तुष्टौ शिवलब्धवरौ गृहम् ।। १८

गतौ गीर्वाणसदृशौ खमिवोमामहेश्वरौ ।

तत्रासौ ब्राह्मणी गेहे बभूवोदारगर्भिणी ।। १९

बभौ पूर्णोदरा श्यामा मेघलेखेव वारिणा ।

कालेऽथ सुषुवे पुत्रान्प्रतिपच्चन्द्रकोमलान् ।। २०

दशबालांस्ततो मुग्धान्वसुधेव नवाङ्कुरान् ।

कृतब्राह्मणसंस्कारा वृद्धिमीयुर्महौजसः ।। २१

स्वल्पेनैव हि कालेन प्रावृषेव नवाम्बुदाः ।

ते सप्तवर्षवयसो बभूवुर्ज्ञातवाङ्मयाः ।। २२

विरेजुस्तेजसा तत्र नभसीवामला ग्रहाः ।

अथ कालेन महता तेषां तौ पितरौ तदा ।। २३

संजग्मतुस्तनुं त्यक्त्वा स्वां गतिं गतिकोविदौ ।

मातापितृभ्यां रहिता दश ते ब्राह्मणास्ततः ।। २४

ययुः कैलासशिखरं गृहं संत्यज्य खेदिनः ।

तत्र संचिन्तयामासुरुद्विग्नास्ते वितन्धवाः ।। २५

किं स्यादिह परं श्रेय ऊचुश्चेदं परस्परम् ।

किमिह स्यात्समुचितं भ्रातरः किमदुःखदम् ।। २६

किं महत्त्वं किमैश्वर्यं किं महाविभवं शुभम् ।

किं तदेतज्जनैश्वर्यं सामन्तो हि महेश्वर ।। २७

सामन्तसंपत्किंनाम राजानो हि महेश्वराः ।

का नाम संपद्भूपानां सम्राडिह महेश्वरः ।। २८

किं नाम तन्महेन्द्रत्वं यन्मुहूर्तं प्रजापतेः । ।।

विनश्यति न यत्कल्पे किं स्यात्तदिह शोभनम् ।। २९ ।।

भाषमाणेष्वथैतेषु ज्येष्ठो भ्राता महामतिः ।

गम्भीरवागुवाचेदं मृगयूथान्मृगो यथा ।। ३०

ऐश्वर्याणां हि सर्वेषामाकल्पं न विनाशि यत् ।

रोचते भ्रातरस्तन्मे ब्रह्मत्वमिह नेतरत् ।। ३१

एतदुक्तं तदखिला द्विजपुत्रास्त उत्तमाः ।

वचोभिरैन्दवास्तत्र साधु साध्वित्यपूजयन् ।। ३२

ऊचुश्चेदं कथं तात सर्वदुःखोपमार्जनम् ।

पद्मासनं जगत्पूज्यं विरञ्चित्वमवाप्नुमः ।। ३३

भ्रात्रा तेन पुनः प्रोक्ता भ्रातरो भूरितेजसः ।

मदुक्तं सर्व एवेमे भवन्तः पालयन्तु वै ।। ३४

पद्मासनगतो भास्वान्ब्रह्माहमिति तेजसा ।
सृजामि संहरामीति ध्यानमस्तु चिराय वः ।। ३५
अग्रजेनेति कथिते बाढं कृत्वा त उत्तमाः ।
ध्यानाधीनधियस्तस्थुः सहैव ज्यायसा रसात् ।।३६
लिपिकर्मार्पिताकारा ध्यानासक्तधियश्च ते ।
अन्तस्थेनैव मनसा चिन्तयामासुरादृताः ।। ३७
अथ उत्फुल्लकमलकोशवक्रोन्नतासनः ।
ब्रह्माहं जगतां स्रष्टा कर्ता भोक्ता महेश्वरः ।। ३८
यज्ञक्रियाक्रमवतः साङ्गोपाङ्गा महर्षयः ।
सरस्वत्याथ गायत्र्या युक्ता वेदा नरा इमे ।। ३९
लोकपालपराक्रान्तः संचरत्सिद्धमण्डलः ।
अयमुद्दामसौभाग्यः स्वर्गः स्वरविभूषितः ।। ४०
पर्वतद्वीपजलधिकाननैः समलंकृतम् ।
इदं भूमण्डलं चैव त्रिलोकीकर्णकुण्डलम् ।। ४१
एतत्पातालकुहरं दैत्यदानवभोजितम् ।
अमृतस्त्रीगणाकीर्णं गृहं गगनकोटरम् ।। ४२
अयमिन्द्रो महाबाहुः प्रजालंकृतदोत्तमः ।
त्रैलोक्यनगरीमेकः पाति पावनयज्ञभुक् ।। ४३
दीप्रजालवरत्राभिरवष्टभ्याथ दिग्गणम् ।
क्रमेण प्रतपन्त्येते भानवो भूरिभानवः ।। ४४
लोकपाला इमे लोकं रक्षन्ति शुद्धवृत्तयः ।
मर्यादाभिरतुच्छाभिर्गोपाला गोगणं यथा ।। ४५
उन्मज्जन्ति निमज्जन्ति प्रस्फुरन्ति पतन्ति च ।
तरङ्गा इव तोयानामिमाः प्रतिदिनं प्रजाः ।। ४६
सृजामीममहं सर्गं संहरामि तथादृतः ।
अयमात्मनि तिष्ठामि शाम्यामि भुवनेश्वरः ।। ४७

अयं संवत्सरो यात इदं परिणतं युगम् ।

सृष्टेरयमसौ कालः स्वयं संहरणस्य च ।। ४८

अयमेव गतः कल्पो ब्राह्मी रात्रिरियं तता ।

अयमात्मनि तिष्ठामि पूर्णात्मा परमेश्वरः ।। ४९

इति भावितया बुद्ध्या ते द्विजा अथ ऐन्दवाः ।

दशाद्रिवृत्तयस्तस्थुः समुत्कीर्णा इवोपलात् ।। ५०

अधिगतकमलासनक्रमास्ते

परिगलितेतरतुच्छवृत्तिजालाः ।

सततमतितरां कुशासनस्था-

श्चिरमिति पङ्कजकल्पने विरेजुः ।। ५१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० ए० ऐन्दवसमाधानं नाम षडशीतितमः सर्गः ।। ८६ ।।